23E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे– २०२४**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय** (23E412)

**दिनांक :३०/०५/२०२४** **गुण :१००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ अ. त्रयाणां माध्यमभाषया अनुवादं कुरुत।** (२४)

१) कस्मिंश्चिद्वनोद्देशे खरनखरो नाम सिंहः प्रतिवसति स्म। स कदाचिदितश्चेतश्च परिभ्रमन् क्षुत्क्षामकण्ठो न किञ्चिदपि सत्त्वमाससाद। ततश्चास्तमनसमये महतीं गिरिगुहामासाद्य प्रविष्टश्चिन्तयामास। 'नूनमेतस्यां गुहायां रात्रौ केनापि सत्त्वेनागन्तव्यं तन्निभृतो भूत्वा तिष्ठामि।'
एतस्मिन्नन्तरे तत्स्वामी दधिपुच्छो नाम शृगालः समायातः। स च यावत्पश्यति तावत्सिंहपदपद्धतिर्गुहायां प्रविष्टा, न च निष्क्रमणं गता। ततश्चाचिन्तयत्–'अहो, विनष्टोऽस्मि। नूनमस्यामन्तर्गतेन सिंहेन भाव्यम्। तत्किं करोमि? कथं ज्ञास्यामि?' एवं विचिन्त्य द्वारस्थः फूत्कर्तुमारब्धः– अहो बिल! इत्युक्त्वा तूष्णीभूय भूयोऽपि तथैव प्रत्यभाषत।

२) कस्मिंश्चिद्वने चतुर्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म। तत्र कदाचिन्महत्यनावृष्टिः सञ्जाता, प्रभूतवर्षाणि यावत् । तया तडागह्रदपल्वलसरांसि शोषममुपगतानि।
अथ तस्मै समस्तगजैः स गजराजः प्रोक्तः–देव! पिपासकुलागजकलभा मृतप्रायाः अपरे मृताश्च। तदन्विष्यतां कश्चिज्जलाशयो यत्र जलपानेन ते स्वस्थतां व्रजन्ति। ततश्चिरं ध्यात्वा तेनाभिहितम्, 'अस्ति महाह्रदो प्रदेशे स्थलमध्यगतः पातालगङ्गाजलेन सदैव पूर्णः तत्तत्र गम्यताम्' इति।
तथानुष्ठिते पञ्चरात्रमुपसर्पद्भिः समासादितस्तैः स ह्रदः। तत्र स्वेच्छया जलमवगाह्यास्तमनवेलायां निष्क्रान्ताः तस्य च ह्रदस्य समन्ताच्छशकबिलान्यसङ्ख्यानि सुकोमलभूमौ तिष्ठन्ति।

३) अथ तच्छ्रुत्वानुजीविनमपृच्छत्, 'भद्र! त्वमपि स्वाभिप्रायं निवेदय। सोऽब्रवीत्, 'देव! दुष्टः स बलाधिको निर्मर्यादश्च, तत्तेन सह सन्धिविग्रहौ न युक्तौ केवलं यानमर्हं स्यात्। ततो युक्तं कर्तुमपसरमणम्। तद् बलवताभियुक्तस्यापसरणसमयोऽयं न सन्धेर्विग्रहस्य च।
एवमनुजीविमन्त्रोऽपसरणस्य।
अथ तस्य वाक्यं समाकर्ण्य प्रजीविनमाह, भद्र! त्वमप्यात्मनोभिऽप्रायं वद। सोब्रवीत्, देव! मम सन्धिविग्रहयानानि त्रीण्यपि न प्रतिभान्ति। विशेषतश्चासनं प्रतिभाति। एवं प्रजीविमन्त्रः।
इदमासनसंज्ञकम्।

४) तद्यथानुश्रूयते अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तस्य समीपस्थोऽनेकशाखासनाथोऽतिसघनतरपत्रच्छन्नो न्यग्रोधपादपोऽस्ति। तत्र च मेघवर्णो नाम वायसराजोऽनेककाकपरिवारः प्रतिवसति स्म। स तत्र विहितदुर्गरचनः सपरिजनः कालं नयति स्म।
तथाऽन्योऽरिमर्दनो नामोलूकराजोऽसङ्ख्योलूकपरिवारो गिरिगुहादुर्गाश्रयः प्रतिवसति स्म। स च रात्रावभ्येत्य सदैव तस्य न्यग्रोधस्य समन्तात् परिभ्रमति। अथोलूकराजः पूर्वविरोधवशाद्य कश्चिद्वायसं समासादयति तं व्यापाद्य गच्छति। एवं नित्याभिगमनाच्छनैः शनैस्तन्न्यग्रोधपादपदुर्गं तेन समन्तान्निर्वायसं कृतम्।

**आ. द्वयोः सान्वयमनुवादं कुरुत।** **(१०)**

१. भूतान् यो नानुगृह्णाति ह्यात्मनः शरणागतान्। भूतार्थास्तस्य नश्यन्ति हंसाः पद्मवने यथा।।

२. अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः। स्वार्थमभ्युद्धरेत्प्राज्ञः स्वार्थभ्रंशो हि मूर्खता।।

३. निःसर्पे हतसर्पे वा भवने सुप्यते सुखम्। दृष्टनष्टभुजङ्गे तु निद्रा दुःखेन लभ्यते।।

**प्र.२ दश रूपाणां परिचयं कारयत। (१०)**

१. भुङ्क्ते    २.कस्याः    ३.भूत्वा    ४. भृत्यस्य
५. तव    ६. अस्तासु    ७. पर्वतेषु    ८. अनुजीविनम्
९. हिताय    १०. शत्रवः    ११. अपृच्छत्    १२. विनष्टा

**प्र.३. दश सन्धिं सन्धिविग्रहं वा कुरुत। (१०)**

१. सरः+तिष्ठति    २. पुरुषैरुक्तम्    ३. शीघ्रमानयत
४. अपि+आवासम्    ५. वृद्धेनोक्तम्    ६. अरिमर्दनः+अब्रवीत्
७. स्थिरजीव्याह    ८. स्वल्पोऽपि    ९. मेघवर्णः+आह
१०. चोत्तमजनाः    ११. नानुगृह्णाति

**प्र.४. दश वाक्यानि सूचनानुसारं परिवर्तयत। (१०)**

१. शशकाश्च सपरिवाराः सुखेन स्वेषु स्थानेषु तिष्ठन्ति स्म।(स्म निष्कासयत।)
२. चितिकां दीपितां पश्य।(भवान् इति कर्तृपदं योजयत।)
३. मुनिना रविः आहूतः।(वाच्यपरिवर्तनं कुरुत।)
४. ते तं व्यापाद्य गच्छन्ति। (वाक्यम् एकवचने परिवर्तयत ।)
५. ---- प्रयच्छामि।(एतत् इति स्त्रीलिंग- सर्वनाम्नः योग्यं रूपं लिखत।)
६. न ममैतत्प्रतिभाति यत् ---- सह सन्धिः क्रियते।(शत्रू' इति पदस्य योग्यं रूपं लिखत।)
७. त्वं लीलया अत्र आगच्छसि।(त्वं स्थाने भवान् इति कर्तृपदं योजयत।।)
८. सः कोपं करिष्यति। (लट्लकारे परिवर्तयत।)
९. सः अचिन्तयत्। (द्विवचने परिवर्तयत।)
१०. शशकाः पश्यन्ति। (लङ्लकारे परिवर्तयत।)
११. सः शरावे दीनारकमेकं दृष्टवान्।(वाच्यपरिवर्तनं कुरुत।)

**प्र.५. द्वे वाक्ये ससन्दर्भं स्पष्टीकुरुत। (२०)**

१. वने प्रज्वलितो वह्निर्दहन्मूलानि रक्षति।
२. परुषाण्यपि जल्पन्तो वध्या दूता न भूभुजा।
३. ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः।

**प्र.६. कामपि कथां स्वशब्दैः संस्कृतेन लिखत। (१६)**

----------